# सगुणा विद्या छात्राणाम् अधिकारः

## सन्नद्धता

# 'ओरुक्कम्'

പൊതുവിദ്യാഭ്യാസ വകുപ്പ്, കേരളം

## ആമുഖം

## മികച്ച വിജയത്തിലേക്ക്

തെരഞ്ഞെടുക്കപ്പെട്ട വിദ്യാലയങ്ങളിൽ 2006ൽ ആരംഭിച്ച **ഗുണമേന്മയുള്ള വിദ്യാഭ്യാസം കുട്ടികളുടെ അവകാശം (QEPR)** പദ്ധതി അതിന്റെ ലക്ഷ്യം നേടിക്കൊണ്ട് മുന്നേറുകയാണ്. അക്കാദമികവും ഭൗതികവുമായ തലങ്ങളിൽ നിരവധി മുന്നേറ്റങ്ങൾ കൈവരിക്കുവാൻ വിദ്യാലയങ്ങൾക്ക് കഴിഞ്ഞിട്ടുണ്ട്. 2009ലെ എസ്.എസ്.എൽ,സി പരീക്ഷയിൽ 25 വിദ്യാലയങ്ങൾ 100% കരസ്ഥമാക്കി. 80%ത്തിലേറെ വിദ്യാലയങ്ങളും 80%ത്തിലേറെ വിജയം നേടുകയുണ്ടായി. ഈ വിജയം നമുക്ക് മെച്ചപ്പെടുത്തേണ്ടതുണ്ട്. കേവല വിജയമല്ല മറിച്ച് മുഴുവൻ വിദ്യാർത്ഥികളെയും സി+ ന് മുകളിൽ എത്തിക്കുക എന്ന ലക്ഷ്യമാണ് നമ്മൾ ആഗ്രഹിക്കുന്നത്. ഈ ലക്ഷ്യം മുന്നിൽ കണ്ടുകൊണ്ട് ഒട്ടേറെ പ്രവർത്തനങ്ങൾ ആവിഷ്കരിച്ചു നടപ്പാക്കി വരുകയാണ്. (കൗൺസലിംഗ്, മെഡിക്കൽ ക്യാമ്പുകൾ, സഹവാസക്യാമ്പുകൾ, അന്വേഷണാത്മക പ്രവർത്തനങ്ങൾ തുടങ്ങിയവ)

മികച്ച വിജയം ലക്ഷ്യമാക്കി 2010 ജനുവരി 26 മുതൽ എല്ലാ ക്യൂ.ഇ.പി.ആർ വിദ്യാലയങ്ങളിലും പ്രത്യേക ക്യാമ്പുകൾ നടത്തുവാൻ തീരുമാനിച്ചിട്ടുണ്ട്. ഈ പരിപാടിയുടെ കാര്യക്ഷമമായ നടത്തിപ്പിന് വേണ്ടിയാണ് **ഒരുക്കം** എന്ന പഠനസഹായി തയ്യാറാക്കിയിട്ടുള്ളത്. സർഗ്ഗാത്മകമായ പുനരനുഭവപ്രവർത്തനങ്ങൾ, മൂല്യനിർണയപ്രവർത്തനങ്ങൾ, അവയുടെ വിശകലനം എന്നിവ ഉൾക്കൊള്ളുന്ന **ഒരുക്കം** കുട്ടികളെ പരീക്ഷയ്ക്ക് സജ്ജരാക്കുന്നതിന് വേണ്ടി പ്രയോജനപ്പെടുത്തേണ്ടതാണ്.

വിദ്യാർത്ഥികൾ, രക്ഷിതാക്കൾ, പ്രാദേശിക ഭരണകൂടങ്ങൾ, വിദ്യാഭ്യാസ പ്രവർത്തകർ തുടങ്ങിയവരുടെ കൂട്ടായ പരിശ്രമത്തിലൂടെ 2009 - 10 വർഷം ഗുണനിലവാരത്തോടെ മികച്ച വിജയം നേടിയെടുക്കാനുള്ള വർഷമായി മാറട്ടെ എന്നും മികച്ച വിജയം നേടാൻ എല്ലാ വിദ്യാലയങ്ങൾക്കും കഴിയട്ടെ എന്നും ആശംസിച്ചുകൊണ്ട്

വിജയാശംസകളോടെ

**എ.പി.എം.മുഹമ്മദ് ഹനീഷ് ഐ.എ.എസ്**
പൊതു വിദ്യാഭ്യാസ ഡയറക്ടർ

# ओरुक्कम् 2010

वर्षेस्मिन् SSLC परीक्षा मार्चमासस्य मध्यकाल आगच्छति। सूक्ष्मतया साधुतया च प्रश्नानाम् उत्तरलेखने छात्राः प्रभवेयुरिति आकलय्य ओरुक्कम् 2010 पुस्तिकेयं प्रकाश्यते।

अत्र सप्त व्यवहाररूपाणि आश्रित्य प्रवर्तनानि आयोजितानि। प्रत्येकं व्यवहाररूपमाश्रित्य के के प्रश्नाः भविष्यन्ति। तेषु कठिनतमाः के? तेषाम् उत्तरलेखने श्रद्धेयाः अंशाः के? मूल्यनिर्णयव्यवस्था कीदृशी? अङ्काः कथं दीयन्ते इति च तत्र तत्र सूचितमस्ति। सार्धघण्टामितानि मूल्यनिर्णयप्रवर्तनानि अत्र आयोजितानि। प्रत्येकस्य प्रवर्तनस्य सज्जीकरणात्मकं प्राक्प्रवर्तनं, पठनप्रक्रियायाः, विस्तृतांशाः, अनुबन्धप्रवर्तनानि च आयोजितानि सन्ति। अध्यापकानां कृते आवश्यकाः विस्तृतांशाश्च योजिताः सन्ति।

2010 जनुवरि मासस्य 26 दिनाङ्कादारभ्य फब्रुवरीमासस्य 16 दिनाङ्कपर्यन्तं (सप्तदशदिनानि) लभ्यमानासु सप्तसत्रेषु इमानि प्रवर्तनानि चालयेदध्यापकः।

पठनप्रवर्तनानामायोजने निर्वहणे च अतीव श्रद्धा देया। एवं छात्राणां परीक्षाभीतिं दूरीकृत्य प्रश्नानाम् उत्तरलेखने मनस्थैर्यं दृढयितुमयम् उद्यमः फलतां यातु इत्याशास्ये।

ഒരുക്കം 2010

# व्यवहाररूपम् - कथा।

**पाठ्यचर्योद्देश्यम्** (C.O.)

- कथायाः कथापात्राणां च वैशिष्ट्यम् अधिकृत्य विचारगोष्ठिषु भागं भजते।
- ऐतिह्यकथाः जातककथाः च पठित्वा तासां वैशिष्ट्यम् अवगच्छति।

समयः 1½ घण्टाः।

## प्राक्प्रवर्तनम्

अध्यापकः कामपि लघुचर्चां प्रचालयति।

- युष्माभिः अस्मिन् वर्षे पठितपूर्वाः कथाः काः?
- तासु इष्टतमा कथा का? कारणं च किम्?
- चर्चां क्रोडीकृत्य श्यामफलके लिखतु।

तिस्रः कथाः - 'मार्गदर्शकः पुत्रः' 'विद्या विवादाय' - 'पतिपरायणा डेस्डिमोणा'।

कारणानि - कथापात्रस्य स्वभावमहिमा।

उपदेशपरत्वम्।

आनुकालिकप्रसक्तिः।

कथामाधारीकृत्य के के प्रश्नाः परीक्षायां भवन्ति। तेषु कठिनः प्रश्नः कः?

- कथापात्राणां स्वभावनिरूपणम्।
- सूचनानुसारं कथालेखनम्।

ʅ कथां पठित्वा प्रश्नानामुत्तरलेखनम्।

तेषु कथापात्राणां स्वभावनिरूपणं कठिनं भवति।

## पठनप्रवर्तनम्।

एवं चेत् अद्य कथापात्राणां स्वभावनिरूपणं कथमिति पश्यामः। छात्रान् पञ्चांगसङ्घान् करोति। छात्राः कथां पठित्वा / चर्चां कृत्वा प्रदत्तां पट्टिकां पूरयन्तु। ततः अवतारयन्तु।

| कथायाः नाम | कथापात्रनाम | स्वभावः | उपदेशः | आनुकालिकसंबन्धः |
|---|---|---|---|---|
| पतिपरायणा डेस्डिमोणा। | ओथल्लः<br><br>ओथल्लः | धैर्यम्<br>उदारता<br>संशयचित्तः<br>कलत्र प्रति अमितस्नेहः। | संशयात्मा-विनश्यति। | इदानीन्तनकाले - अपि शङ्कित-चित्ताः कुचेष्टि-तानि कुर्वन्ति। |
| ................<br>................ | ................<br>................ | ................<br>................ | ................<br>................ | ................<br>................ |
| ................<br>................ | ................<br>................ | ................<br>................ | ................<br>................ | ................<br>................ |

अध्यापकः पट्टिकां क्रोडीकरोति।

ततः इष्टस्य कस्यचन कथापात्रस्य (ओथल्लो महाशयस्य) स्वभावनिरूपणं व्यक्तिशः लिखन्तु छात्राः।

ततः परस्परं विनिमाय वाचयन्तु। स्वभावनिरूपणस्य मूल्यनिर्णयः कथं क्रियते इति लघुचर्चा चालनीया। चर्चाफलत्वेन एताः सूचनाः रूपीकरणीयाः।

ഒരുക്കം 2010

- कथायाः कथापात्रस्य च नाम वैशिष्ट्यं च सूचितम्।
- स्वभाववैशिष्ट्यघटनाः सूचिताः।
- उपसंहारत्वेन आनुकालिकप्रसक्तिः कथायाः उपदेशः च सूचितः।
- उचिताभाषा वाक्यघटना च अस्ति।

छात्राः उत्तमानि निरूपणानि चिन्वन्तु। द्वित्राः अवतारयन्तु। अध्यापकः तानि क्रोडीकृत्य वदन्तु। स्वभावनिरूपणस्य परिष्करणं (आशयपरं, घटनापरं, वाक्यघटनापरं) करोतु। ततः छात्रान् स्वलिखितस्य परिष्करणाय प्रेरयतु। (अनुबन्धप्रवर्तनम्।)

N.B. एवं अन्येषां कथापात्राणां स्वभावनिरूपणाय छात्राः प्रेरयितव्याः।

**स्वभावनिरूपणं मातृका -**

आङ्गलकथासु मम इष्टतमा नाटककथा भवति 'पतिपरायणा डेस्डिमोणा'। तत्र नायकः भवति 'ओथल्लः'। सः धैर्यवान्, उदारशीलः, कलत्रं प्रति अमितस्नेहयुक्तः, शङ्कितचित्तः च भवति। (आमुखम्)

स्वभाववैशिष्ट्यप्रतिपादकाः घटनाः कथातः स्वीकृत्य लेखनीयाः।

उदाः उदारशीलः - द्वीपरक्षणे कासियस्य नियोगः।

धैर्यशाली - नगराध्यक्षस्य पुरतः स्वानुरागवृत्तान्तकथनम्। युद्धाय तेन कृतः सन्नाहः च।

कलत्रं प्रति अमितस्नेहः, शङ्कितचित्तः - भार्यां प्रति अनुरागाधिक्यं ततः संशयश्च। (विस्तृतांशः)

कथायाः उपदेशः 'संशयात्मा विनश्यति'। कथायाः आनुकालिकप्रसक्तिः - आधुनिके कालेऽपि एतादृशाः मनुजाः स्वकलत्रं द्रुह्यन्ति। (उपसंहारः)

ഒരുക്കം 2010

# व्यवहाररूपम् - काव्यम्।

## पाठ्यचर्योद्देश्यम् (C.O.)

- काव्यं पठित्वा आशयं धर्मोपदेशं च स्वांशीकरोति।
- काव्यास्वादने नैपुणीं सम्पादयति।

समयः 1½ घण्टाः।

## प्राक्प्रवर्तनम्

'काव्यसम्बन्धीनि मूल्यनिर्णयप्रवर्तनानि कानि' इति लघुचर्चां प्रचालयति।

चर्चां एवं क्रोडीकरोति च।

- श्लोकानामाशयलेखनम्।
- श्लोकं पठित्वा प्रदत्तानां प्रश्नानामुत्तरलेखनम्।
- इष्टतमस्य श्लोकस्य चयनं कारणलेखनं च।
- काव्यस्य गद्यरूपेण आविष्कारः।

साधारणतया मूल्यनिर्णयप्रवर्तनेषु पूर्वोक्तानां प्रवर्तनानां सद्भावः विद्यते। एतेषु कस्य उत्तरलेखने भवन्तः महान्तं क्लेशम् अनुभवन्ति। प्रायशः इष्टतरस्य श्लोकस्य चयने कारणलेखने च प्रयासः विद्यते।

## पठनप्रवर्तनम्।

अध्यापकः अधः प्रदत्तौ श्लोकौ चार्ट्पत्रे विलिख्य प्रदर्शयति।

ഒരുക്കം 2010

**त्वां प्रगृह्य बत भीतिभावना-**
**भासुराननसरोजमाशु सा।**
**रोषरूषितमुखी सखीपुरो**
**बन्धनाय रशनामुपाददे।।**

**बन्धुमिच्छति यमेव सज्जन-**
**स्तं भवन्तमयि बन्धुमिच्छती।**
**सा नियुज्य रशनागुणान् बहून्**
**द्वयङ्गुलोनमखिलं किलैक्षत।।**

अनयोः इष्टतरः श्लोकः कः? कारणं च लिखत। अध्यापकः लघुचर्चां चालयति।

श्लोकयोः इष्टतरः कः इति कथं विवेचयति?

छात्रैः उक्तान् अंशान् क्रोडीकृत्य लिखति अध्यापकः।

- उचितः तालः।
- आशयचारुता।
- पदचारुता, पदौचित्यम्।
- अलङ्कारः।

छात्रान् युगलीकृत्य श्लोकानाम् आलपनाय आशयस्य लेखनाय च प्रेरयति। छात्रौ श्लोकालपने भेदः अस्ति वा न वा इति विवेचयताम्। अत्र आलपने भेदः नास्ति। समानवृत्तबद्धौ श्लोकाविमौ। आशयचारुता कथं ज्ञायते? श्लोकयोः आशयः लेखनीयः।

आशयलेखने आमुखत्वेन काव्यस्य तत्कर्तुः च नाम सन्दर्भश्च योजनीयम्।

ഒരുക്കം 2010

श्रीनारायणभट्टपादैः विरचितात् नारायणीयनामकात् स्तोत्रकाव्यात् उद्धृतोऽयं श्लोकः।

मन्थदण्डेन दधिभाजनं पाटितं कृष्णं अदृष्ट्वा कोपेन अन्विष्यन्ती सा यशोदा भगवन्तम् उलूखले स्थितं मार्जाराय नवनीतं यच्छन्तं अपश्यत्। तदा तं बन्धुं सा अयतत। सज्जनः यं बन्धुमिच्छति तं भवन्तं माता यशोदा रशनया बन्धुमिच्छतीति अत्र वर्ण्यते। बन्धनार्थम् उद्धृताः रशनागुणाः भगवतः प्रभावेन द्वयङ्गुलोनमभवत्।

पदचारुता कथं निर्णीयते। पदानाम् आवर्तने सत्यपि अर्थभेदः अस्ति। 'बन्धुमिच्छति' 'बन्धुमिच्छती' इति हृद्योऽयं प्रयोगः। अतः एव अयं श्लोकः मम इष्टतरः।

इति क्रोडीकरणं च अवश्यं योजयेत्।

## अनुबन्धप्रवर्तनम्।

'हनुमता दृष्टं पुष्पकविमानम्' इति पाठात् श्लोकद्वयं स्वीकृत्य इष्टतरस्य सकारणं विवेचनाय छात्राः प्रेरणीयाः।

# व्यवहाररूपम् - उपन्यासः (जीवनचरितम्)।

**पाठ्यचर्योद्देश्यम्** (C.O.)

- महात्मनां जीवनचरितानि सम्पाद्य सम्पुटम् आरचयति।

## जीवनचरितलेखनम्।

समयः 1½ घण्टाः।

**प्राक्प्रवर्तनम्**

'अस्माभिः के के उपन्यासाः पठिताः' इति प्रश्नम् उपन्यस्यति अध्यापकः। 'दार्शनिकः शङ्करः' 'काश्चन केरलीयदृश्यकलाः' इति उपन्यासद्वयम्। परीक्षाविषये कानि कानि प्रवर्तनानि विद्यन्ते।

- उपन्यासं पठित्वा प्रश्नानामुत्तरलेखनम्।
- सूचनानुसारं जीवनचरितलेखनम्।
- भाषान्तरीकरणम्।

अत्र सूचनानुसारं जीवनचरितलेखने श्रद्धेयाः अंशाः के? अध्यापकः चर्चां क्रोडीकृत्य एवं लिखति।

- सूचनाः सर्वाः स्वीकरणीयाः।
- आशयस्य क्रमीकरणम् आवश्यकम्।
- उचिता भाषा।

अध्यापकः अधः प्रदत्तं जीवनचरितं वाचनाय वितरति। छात्राः जीवनचरितं पठित्वा अधः प्रदत्तान् अंशान् योजयन्तु।

## स्वामिविवेकानन्दः।

कोलक्कत्तायां एकस्मिन् समुन्नतकुले 1863 क्रिस्त्वब्दे विवेकानन्द इति पश्चात् प्रसिद्धः नरेन्द्रनाथः जनिमलभत। पिता विश्वनाथदत्तः माता भुवनेश्वरीदेवी चासीत्। पितुः राज्यस्नेहः मातुः आध्यात्मिकचिन्ता च शैशवे एव नरेन्द्रे सम्मिलति स्म। बालो नरेन्द्रः सर्वेषु विषयेषु प्रवीणः आसीत्। आध्यात्मिककार्येषु संशयग्रस्तः नरेन्द्रः श्रीरामकृष्णपरमहंसस्य शिष्यत्वं स्वीचकार। 1886 तमे वर्षे श्रीरामकृष्णः समाधिं प्राप। तदनन्तरं नरेन्द्रः सुहृद्भिः सह संन्यासं स्वीचकार। स्वामी विवेकानन्दः इति नाम च स्वीकार। अतः परं विवेकानन्दः भारते सर्वत्र पर्यटति स्म। तस्मिन्नवसरे केरलदेशे श्रीनारायणगुरुचट्टम्पिस्वामिप्रभृतिभिः यतिवर्यैः सह मेलनमपि सञ्जातम्। त्रिनवत्यधिकाष्टादशशततमे क्रिस्तब्दे चिक्कागो नगरे प्रचलिते सर्वधर्मसम्मेलने स्वामिना कृतं प्रभाषणं विश्वविख्यातमेव। सर्वधर्मसम्मेलने स्वामिना कृतं प्रभाषणं विश्वविख्यातमेव। सर्वधर्मसमन्वयादेव मानवमैत्री इति विवेकानन्दस्य सन्देशः। द्वयुत्तरनवशताधिकसहस्रतमे वर्षे सोऽयं भारतस्य सुपुत्रः समाधिं प्राप।

'उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत' इति जनान् उदबोधयदयं युगप्रभावः।

नाम - ..................................।

जन्म, जन्मस्थलम् - ..................................।

पितरौ - ..................................।

विद्याभ्यासः - ..................................।

कर्ममण्डलम् - ..................................।

ग्रन्थाः - ..................................।

मरणम् - ..................................।

छात्राः केन्द्राशयम् अवतारयन्तु। अध्यापकः क्रोडीकरोतु।

l जीवनचरितलेखने इमे अंशाः अवश्यं योजनीयाः।

ततः श्रीनारायणगुरुदेवस्य जीवनचरितसूचनाः चार्ट्पत्रे विलिख्य प्रदर्शयति अध्यापकः।

ഒരുക്കം 2010

| | | |
|---|---|---|
| नाम | - | श्रीनारायणगुरुदेवः। |
| जन्म, जन्मस्थलम् | - | 1856, तिरुवनन्तपुरं, चेम्पषन्ति ग्रामे। |
| पितरौ | - | माटनाशान्, कुट्टियम्मा। |
| विद्याभ्यासः | - | गुरुकुलात् संस्कृतभाषा, द्राविडभाषा, आयुर्वेदः। |
| कर्ममण्डलम् | - | अध्यापकः, अवधूतत्वेन दक्षिणभारतेषु देवालयेषु पर्यटनम्, नारायणगुरुः इति प्रसिद्धिः। |
| उद्बोधनम् | - | एका जातिः, एको धर्मः, एको देवः मानवस्य। मद्यं विषं, तत् मा पिब, मा निर्माहि, मा विक्रीणीहि। |
| ग्रन्थाः | - | आत्मोपदेशशतकम्, दर्शनमाला, दैवदशकम्। |
| मरणम् | - | 1928 तमे वर्षे। |

छात्राः सूचनानुसारं जीवनचरितं लिखन्तु। सङ्घे उपविश्य उत्तमं जीवनचरितं चिन्वन्तु। ततः अवतारयन्तु। कस्य सङ्घस्य जीवनचरितं उत्तममिति चर्चां चालयतु अध्यापकः। कति अङ्काः दातव्याः? कथम्? चर्चाम् एवं क्रोडीकरोति च।

- सूचनाः सर्वाः स्वीकृताः - 2
- आशयस्य क्रमीकरणं विस्तारं च - 2
- उचिता भाषा - 1

अध्यापकः कस्यचन सङ्घस्य जीवनचरितं परिष्करोति। (Editing) च। ततः सर्वे स्वलिखितानि जीवनचरितानि परिष्कुर्वन्तु। इतरेषां महात्मनां जीवनचरितानि सम्पाद्य चित्राणि च योजयित्वा संपुटरूपेण प्रकाशयन्तु।

## अनुबन्धप्रवर्तनम्।

पुस्तकस्य संपुटीकरणम्। औपचारिकप्रकाशनं च।

# व्यवहाररूपम् - सञ्चारसाहित्यम्।

**पाठ्यचर्योद्देश्यम्** (C.O.)

- यात्रायां दृष्टान् विशेषान् अधिकृत्य लिखति।

**अविस्मरणीया कापि यात्रा -** समयः 1½ घण्टाः।

## प्राक्प्रवर्तनम्

अध्यापकः स्वेनानुष्ठितां कामपि यात्राम् अधिकृत्य वर्णयतु। यात्रावर्णनायाम् अधः प्रदत्ताः अंशाः अवश्यं योजनीयाः।

- यात्रायाः समयः (मासः, तिथिः)।
- के? के? कुत्र यात्रां कृतवान्?
- किमाश्रित्य यात्रा (बस्यानम्, रेल्यानम्)?
- किं किं दृष्टवान्, कदाः?
- विशेषदृश्यानि कानि?
- कुत्र उषितवन्तः?
- किं किं भुक्तवन्तः?
- कदा प्रत्यागताः?
- यात्रा कथमासीत्?

छात्राः विवरणं सश्रद्धं श्रृण्वन्तु। ततः श्रुतानंशान् योजयित्वा वैयक्तिकतया एकं यात्राविवरणं च लिखन्तु। यात्राविवरणस्य लेखनं कथमिति चर्चा चालनीया।

आमुखरूपेण यात्रायाः तिथिः, यात्रिकाः, प्राप्तिस्थातं च सूचनीयम्।

विवरणे कुत्र कुत्र गतवन्तः? किं किं दृष्टवन्तः? किं किं भुक्तवन्तः? कुत्र उषितवन्तः..... इति लेखनीयम्।

उपसंहारेण तु अविस्मरणीयाः घटनाः स्वानुभवांश्च सूचयेत्।

लिखितानि यात्राविवरणानि परस्परं विनिमीय वाचयन्तु छात्राः। वाचनावसरे अङ्कदानमपि करणीयम्। तदर्थम् अङ्कदानसूचकाः अपि रूपीकरणीया।

- उचितस्य आमुखस्य कृते - 1 अङ्कः।
- विवरणस्य कृते - 2 अङ्कौ।
- उपसंहारस्य कृते - 1 अङ्कः।
- उचितवाक्यघटनायाः कृते - 1 अङ्कः।

अध्यापकः छात्रैः लिखितं किमपि विवरणं परिष्करोतु।

परिष्करणे

- घटनापरम्।
- आशयपरम्।
- वाक्यघटनापरम् च।

लिखितं विवरणं परिष्कर्तुमपि अवसरः देयः। (Editing)

## अनुबन्धप्रवर्तनम्।

यात्रायां दृष्टान् विशेषान् लेखरूपेण प्रदर्शयितुमपि अनुशीलनं कार्यम्।

लेखरूपेण प्रदर्शनावसरे स्थलनाम, दिनाङ्कः, उचितं सम्बोधनम्, प्रेषकस्य हस्ताक्षरम्, स्वीकर्तुः सङ्केतश्च योजनीयानि।

ഒരുക്കം 2010

# व्यवहाररूपम् - वाक्यघटनापरम्।

**पाठ्यचर्योद्देश्यम्** (C.O.)

- अव्ययानां प्रयोगपरिचयं सम्पादयति।
- सतिसप्तमीप्रयोगं परिचिनोति।

**वाक्यपरिवर्तनम् -** समयः 1½ घण्टाः।

**प्राक्प्रवर्तनम्**

अध्यापकः अधः प्रदत्तं वाक्यं श्यामफलके लिखति।

**"यदा विद्युदागच्छति तदा गोलदीपः प्रकाशते"।**

छात्राः वाक्यं पठित्वा तत् वाक्यद्वयत्वेन विश्लेषयन्तु।

यथा - विद्युदागच्छति।

गोलदीपः प्रकाशते।

गोलदीपः कदा प्रकाशते इति प्रश्नं पृच्छति अध्यापकः। छात्राः तस्य उत्तरं वदन्तु। एवं समकालिकक्रियायुक्तानि वाक्यानि लिखन्तु छात्राः। (एकैकेनापि न्यूनातिन्यूनं एकं वाक्यं लेखनीयम्) ततः अवतारयन्तु।

अध्यापकः वाक्यानि संशोध्य दशमितानि वाक्यानि श्यामफलके लिखतु। ये आशयचारुतया वाक्यानि उक्तवन्तः ते अभिनन्दनीयाश्च।

वाक्यानां मातृकाः।

यदा निद्रा आगच्छति तदा शयनगृहं प्रविशति। (लट्)

यदा बुभुक्षा आयाति तदा भोजनं स्वीकरोति। (लट्)

यदा वर्षा आगच्छति तदा बालकाः छत्रं स्वीकुर्वन्ति। (लट्)

यदा रामः वनं गतः तदा सीता तमन्वगच्छत्। (भूतकालः)

यदा अध्यापकः आगमिष्यति तदा छात्राः स्थास्यन्ति। (लृट्)

अत्र लिखितानां वाक्यानां विशेषतामधिकृत्य लघुचर्चा चालनीया।

**चर्चासूकाः।**

- प्रथमवाक्यांशे क्रिया का?
- सा क्रिया कदा सम्भवति?
- वाक्यस्य द्वितीयांशे क्रिया का?
- सा क्रिया कदा सम्भवति?
- अनयोः बन्धः कः?

चर्चां एवं क्रोडीकरोति।

प्रथमक्रिया कदा सम्भवतीति निश्चयः अस्ति। उदाः सूर्योदयः, वर्षागमनम् etc. द्वितीयक्रिया तु प्रथमक्रियापत्तौ एव सम्भवतीति अवगन्तव्या। तस्मात् यदा - तदा इति वाक्यप्रयोगे द्वितीयक्रियायाः पूर्वस्थापनमशक्यम्।

यदा सूर्यः उदयते तदा कमलानि विकसन्ति इत्यत्र कमलानां विकासः कदा सम्भवतीति वस्तुतया न विद्मः। किन्तु तस्य निर्णयः सूर्यस्य उदयकाले एव इति सम्भवति। एकेन भावेन (क्रियया) अन्यस्य भावस्य (क्रियायाः) निर्णयः यत्र भवति तत्र 'यदा - तदा' प्रयोगः।

## सतिसप्तमी प्रयोगः।

यदा तदा प्रयोगस्य स्थाने सतिपसप्तमीप्रयोगं कर्तुं शक्यते। प्रथमवाक्ये कर्तृपदं सप्तम्यां प्रयोक्तव्यम्। क्रियापदं तु शत्रन्त/शानजन्तरूपेण परिवर्तनीयम्। यथा -

सूर्ये उदयमाने सति कमलानि विकसन्ति।

## अन्यानि उदाहरणानि -

- निद्रायाम् आगच्छत्यां सत्यां शयनगृहं प्रविशति बालः।
- बुभुक्षायाम् आगच्छत्यां सत्यां भोजनं स्वीकरोति।
- रामे वनं गते सीता तमन्वगच्छत्।
- अध्यापके आगमिष्यति सति छात्राः स्थास्यन्ति।

## अनुबन्धप्रवर्तनम्।

एवम् अन्येषां वाक्यानामपि परिवर्तनाय छात्राः प्रेरणीयाः।

ഒരുക്കം 2010

# व्यवहाररूपम् - सम्भाषणम्।

## पाठ्यचर्योद्देश्यम् (C.O.)

- काव्यांशान् सम्भाषणरूपेण परिवर्तयति।

**सम्भाषणरचना -** समयः 1½ घण्टाः।

## प्राक्प्रवर्तनम्

अध्यापिका प्रश्नवाचकानि पदानि अधिकृत्य लघुचर्चां चालयति, क्रोडीकरोति च।

- सम्भाषणं नाम प्रश्नोत्तररूपं भवति।
- उचितस्य प्रश्नस्य उचितं उत्तरम् एव दातव्यम्।
- उचितप्रयोगः।

व्याक्षेपकशब्दानां (हा, अहो, रे.....) उपयोगः।

प्रश्नवाचकपदानि।

- किम् (कः, का, किम्)।
- कदा।
- कुत्र।
- कथम्।
- किमर्थम्।
- कियत्।
- कति।
- कुतः।

ഒരുക്കം 2010

## पठनप्रवर्तनम्।

अध्यापकः अधः प्रदत्तं सम्भाषणांशं चार्ट्पत्रे विलिख्य प्रदर्शयति। रिक्तांशान् छात्राः उचितप्रश्नवाचकशब्देन पूरयन्तु।

| | | |
|---|---|---|
| उद्दण्डः | - | अरे! तव नाम .............? |
| काक्कश्शेरी | - | अहं काक्कश्शेरी। |
| उद्दण्डः | - | त्वं ............. आगतः? |
| काक्कश्शेरी | - | भवन्तं विजेतुम्। |
| उद्दण्डः | - | रे! रघुवंशे ............. सर्गाः विद्यन्ते? |
| काक्कश्शेरी | - | नवदश खलु। |
| उद्दण्डः | - | ............. बिडालः आनीतः? |
| काक्कश्शेरी | - | शुकस्य त्रासाय। |

(किम्, कति, कः, किमर्थम्, कुत्र)

छात्राः उचितप्रश्नवाचकपदेन रिक्तांशान् पूरयन्तु, अवतारयन्तु। पूरणस्य औचित्यमधिकृत्य लघुचर्चा चालनीया।

यथा - नाम नपुंसकलिङ्गशब्दः तस्मात् किं शब्दः, .............................

## अनुबन्धप्रवर्तनम्।

अधः प्रदत्तान् कथासन्दर्भान् छात्राः सम्भाषणरूपेण लिखन्तु। परस्परं विनिमीय वाचयन्। तदा सम्भाषणस्थानां प्रश्नवाचकपदानां प्रयोगौचित्यं परीक्षन्ताम्।

- ओथल्लस्य नगराध्यक्षस्य च मिथः भाषणम्।
- दुष्यन्तस्य आवुत्तस्य च मिथः भाषणम्।
- पितामहस्य श्मशानगमनवेलायां वसिष्ठकस्य पुत्रस्य च मिथः भाषणम्।
- श्मशानात् प्रत्यागमनावसरे वसिष्ठकस्य तत्पत्न्याः च मिथः भाषणम्।

ഒരുക്കം 2010

# व्यवहाररूपम् - न्यायः (उपन्यासः)।

**पाठ्यचर्योद्देश्यम्** (C.O.)

- लौकिकन्यायान् परिचिनोति प्रयुङ्क्ते च।

**न्यायविवेचनम्** - समयः 1½ घण्टाः।

**प्राक्प्रवर्तनम्**

अध्यापकः काञ्चन घटनां चार्ट्पत्रे विलिख्य प्रदर्शयति।

- धनाभिलाषी रामः गृहे दुःखितः अतिष्ठत्। यदृच्छया कोऽपि धनिकः सुहृत् तत्रागतवान्। आवश्यकं धनं च दत्तवान्।

छात्राः घटनां पठित्वा न्यायेन सह योजयन्तु। नूतनां कामपि घटनां च लिखन्तु। द्वित्राः अवतारयन्तु। अध्यापकः घटनायाः साधुतां परीक्षताम्।

ततः अध्यापकः एवं क्रोडीकरोतु।

**आकस्मिकतया विपत् वा संपत् वा आयाति तत्र काकतालीयं न्यायः।**

**पठनप्रवर्तनम्।**

अध्यापकः अधः प्रदत्ताः न्यायाः कर्गजखण्डेषु विलिख्य सर्वेभ्यो वितरति।

- दण्डापूपन्यायः।
- स्थालीपुलाकन्यायः।
- कूपमण्डूकन्यायः।
- अरण्यरोदनन्यायः।

छात्राः लब्धन्यायानुसारं चतुर्षु सङ्घेषु उपविश्य पाठ्यांशं सम्यक् पठित्वा न्यायस्य समर्थनात्मिकां नूतना घटनाः यावच्छक्यं लिखन्तु। ततः अध्यापकः प्रतिसङ्घम् आवश्यकं साहाय्यं करोतु। तदर्थम् अधः प्रदत्ताः घटनाः स्वीकरणीयाः।

## अरण्यरोदनन्यायः।

- मद्यासक्तं स्वभर्तारं तस्मात्कर्मणः निवारयितुं सुशीला महान्तं प्रयत्नं कृतवती। किन्तु तस्याः पतिः मद्यपानात् न निवृत्तोऽभवत्।
- व्योम्नि सञ्चरत् विमानं अग्निसात्कृतम्। तत्र वर्तमानाः यात्रिणः रक्षायै दीनं व्यलपन्।
- अपठन् कश्चन छात्रः परीक्षासमये किमपि अजानन् साहाय्यं अभ्यर्थयते स्म। किन्तु नैकोपि तस्य साहाय्यमकरोत्।

## कूपमण्डूकन्यायः।

- कुम्भकारः पण्डितसभां आगत्य 'अहं सर्वज्ञः' इति अवदत्। पण्डिताः तं सम्मान्य द्वित्रान् प्रश्नानपृच्छन्। सः न किञ्चिदपि उत्तरयति स्म।
- कस्मिन्नपि वैज्ञानिकसम्मेलने धनिकः कश्चिदागत्य स्वाल्पज्ञतां प्राकटयत्। सर्वे वैज्ञानिकाः तच्छ्रुत्वा तम् उपहसन्ति स्म।
- किञ्चन ग्रामीणमापणम्। केचन जनास्तत्रोपविश्य उच्चैः सम्भाषणमकुर्वन्। तेष्वेकस्य भाषणं श्रुत्वा अन्यः कश्चन एवमचिन्तयत्। "एषः कदापि अन्यं ग्रामं नगरं वा न गतवान् स्यात्" इति।

## स्थालीपुलाकन्यायः।

- कश्चित् पथिकः विश्रमार्थम् आश्रमं कञ्चन प्राप। तत्र बहवः काषायवस्त्रधारिणः आसन्। तेष्वेकः अनर्गलं धर्मोपदेशं कुर्वन्नासीत्। पथिकस्तु तद्दृष्ट्वा 'तत्रत्याः सर्वे पण्डिताः भवन्ति' इति अमन्यत।
- ग्रीष्मकाले कश्चन कर्षकः ग्रामान्तरं गतः। तत्र एकस्मिन् कूपे महान्तं स्फटिकं जलं दृष्ट्वा सोऽचिन्तयत् "अत्र सर्वेषु कूपेषु समृद्धं जलं स्यात्" इति।

ഒരുക്കം 2010

- कानने विचरन् कश्चन व्याधः मृगमेकमपश्यत्। तदा सः वनं मृगाकीर्णं इति आकलयत्।

**दण्डापूपन्ययः।**

- तीक्ष्णेन भूकम्पेन ग्रामे वर्तमानानि गृहाणि सर्वाण्यपतन्। उन्नतानां सौधानां किमु वक्तव्यम्!
- पादेन पङ्गुः रामः विंशतिमितेन निमेषेण क्रोशमेकं सञ्चचार। इतरे विंशतिमितेन निमेषेण क्रोशमेकं सञ्चचेरूरिति केचन संशयमपृच्छत्।
- झञ्झावातेन अपक्वान्याम्राणि सर्वाणि भूतले विकीर्णानि। किं पुनः पक्वानां फलानामवस्था!

ततः छात्राः न्यायकेलिं प्रचालयन्तु। प्रथमसङ्घः घटनामेकाम् अवतारयतु, द्वितीयसङ्घः तत्सम्बन्धिनं न्यायं च वदन्तु। पुनः व्युत्क्रमेण च। तृतीयचतुर्थयोः सङ्घयोरपि अवसरः कल्पनीयः। यः सङ्घः परमतः घटनाः न्यायांश्च साधुरूपेण अवतारयति सः सङ्घः अभिनन्दनीयः।

**अनुबन्धप्रवर्तनम्।**

छात्राः प्रत्येकं न्यायमाधारीकृत्य द्वित्राः घटनाः सञ्चिन्वन्तु।

ഒരുക്കം 2010

V